श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकोनाशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनाशीतितमः सर्गः ॥

## श्रीरामेण मकराक्षस्य वधः

निर्गतं मकराक्षं ते दृष्ट्वा वानरपुङ्गवाः।
आप्लुत्य सहसा सर्वे योद्धुकामा व्यवस्थिताः॥ **6.79.1** ॥

ततः प्रवृत्तं सुमहत् तद् युद्धं लोमहर्षणम्।
निशाचरैः प्लवङ्गानां देवानां दानवैरिव॥ **6.79.2** ॥

वृक्षशूलनिपातैश्च गदापरिघपातनैः।
अन्योन्यं मर्दयन्ति स्म तदा कपिनिशाचराः॥ **6.79.3** ॥

शक्तिखड्गगदाकुन्तैस्तोमरैश्च निशाचराः।
पट्टिशैर्भिन्दिपालैश्च बाणपातैः समन्ततः॥ **6.79.4** ॥

पाशमुद्गरदण्डैश्च निर्घातैश्चापरैस्तथा।
कदनं कपिसिंहानां चक्रुस्ते रजनीचराः॥ **6.79.5** ॥

बाणौघैरर्दिताश्चापि खरपुत्रेण वानराः।
सम्भ्रान्तमनसः सर्वे दुद्रुवुर्भयपीडिताः॥ **6.79.6** ॥

तान् दृष्ट्वा राक्षसाः सर्वे द्रवमाणान् वनौकसः।
नेदुस्ते सिंहवद् दृप्ता राक्षसा जितकाशिनः॥ **6.79.7** ॥

विद्रवत्सु तदा तेषु वानरेषु समन्ततः।
रामस्तान् वारयामास शरवर्षेण राक्षसान्॥ **6.79.8** ॥

वारितान् राक्षसान् दृष्ट्वा मकराक्षो निशाचरः।
कोपानलसमाविष्टो वचनं चेदमब्रवीत्॥ **6.79.9** ॥

तिष्ठ राम मया सार्धं द्वन्द्वयुद्धं भविष्यति।
त्याजयिष्यामि ते प्राणान् धनुर्मुक्तैः शितैः शरैः॥ **6.79.10** ॥

यत् तदा दण्डकारण्ये पितरं हतवान् मम।
तदग्रतः स्वकर्मस्थं स्मृत्वा रोषोऽभिवर्धते॥ **6.79.11** ॥

दह्यन्ते भृशमङ्गानि दुरात्मन् मम राघव।
यन्मयासि न दृष्टस्त्वं तस्मिन् काले महावने॥ **6.79.12** ॥

दिष्ट्यासि दर्शनं राम मम त्वं प्राप्तवानिह।
काङ्क्षितोऽसि क्षुधार्तस्य सिंहस्येवेतरो मृगः॥ **6.79.13** ॥

अद्य मद्बाणवेगेन प्रेतराड्विषयं गतः।
ये त्वया निहताः शूराः सह तैश्च वसिष्यसि॥ **6.79.14** ॥

बहुनात्र किमुक्तेन शृणु राम वचो मम।
पश्यन्तु सकला लोकास्त्वां मां चैव रणाजिरे॥ **6.79.15** ॥

अस्त्रैर्वा गदया वापि बाहुभ्यां वा रणाजिरे।
अभ्यस्तं येन वा राम वर्ततां तेन वा मृधम्॥ **6.79.16** ॥

मकराक्षवचः श्रुत्वा रामो दशरथात्मजः।
अब्रवीत् प्रहसन् वाक्यमुत्तरोत्तरवादिनम्॥ **6.79.17** ॥

कत्थसे किं वृथा रक्षो बहून्यसदृशानि ते।
न रणे शक्यते जेतुं विना युद्धेन वाग्बलात्॥ **6.79.18** ॥

चतुर्दश सहस्राणि रक्षसां त्वत्पिता च यः।
त्रिशिरा दूषणश्चापि दण्डके निहतो मया॥ **6.79.19** ॥

स्वाशिताश्चापि मांसेन गृध्रगोमायुवायसाः।
भविष्यन्त्यद्य वै पाप तीक्ष्णतुण्डनखाङ्कुशाः॥ **6.79.20** ॥

राघवेणैवमुक्तस्तु मकराक्षो महाबलः।
बाणौघानमुचत् तस्मै राघवाय रणाजिरे॥ **6.79.21** ॥

ताञ्छराञ्छरवर्षेण रामश्चिच्छेद नैकधा।
निपेतुर्भुवि विच्छिन्ना रुक्मपुङ्खाः सहस्रशः॥ **6.79.22** ॥

तद् युद्धमभवत् तत्र समेत्यान्योन्यमोजसा।
खरराक्षसपुत्रस्य सूनोर्दशरथस्य च॥ **6.79.23** ॥

जीमूतयोरिवाकाशे शब्दो ज्यातलयोरिव।
धनुर्मुक्तः स्वनोऽन्योन्यं श्रूयते च रणाजिरे॥ **6.79.24** ॥

देवदानवगन्धर्वाः किन्नराश्च महोरगाः।
अन्तरिक्षगताः सर्वे द्रष्टुकामास्तदद्भुतम्॥ **6.79.25** ॥

विद्धमन्योन्यगात्रेषु द्विगुणं वर्धते बलम्।
कृतप्रतिकृतान्योन्यं कुरुतां तौ रणाजिरे॥ **6.79.26** ॥

राममुक्तांस्तु बाणौघान् राक्षसस्त्वच्छिनद् रणे।
रक्षोमुक्तांस्तु रामो वै नैकधा प्राच्छिनच्छरैः॥ **6.79.27** ॥

बाणौघवितताः सर्वा दिशश्च प्रदिशस्तथा।
सञ्छन्ना वसुधा चैव समन्तान्न प्रकाशते॥ **6.79.28** ॥

ततः क्रुद्धो महाबाहुर्धनुश्चिच्छेद संयुगे।
अष्टाभिरथ नाराचैः सूतं विव्याध राघवः॥ **6.79.29** ॥

भित्त्वा रथं शरै रामो हत्वा अश्वानपातयत्।
विरथो वसुधास्थः स मकराक्षो निशाचरः॥ **6.79.30** ॥

तत्तिष्ठद् वसुधां रक्षः शूलं जग्राह पाणिना।
त्रासनं सर्वभूतानां युगान्ताग्निसमप्रभम्॥ **6.79.31** ॥

दुरवापं महच्छूलं रुद्रदत्तं भयङ्करम्।
जाज्वल्यमानमाकाशे संहारास्त्रमिवापरम्॥ **6.79.32** ॥

यं दृष्ट्वा देवताः सर्वा भयार्ता विद्रुता दिशः।
विभ्राम्य च महच्छूलं प्रज्वलन्तं निशाचरः॥ **6.79.33** ॥

स क्रोधात् प्राहिणोत् तस्मै राघवाय महाहवे।
तमापतन्तं ज्वलितं खरपुत्रकराच्च्युतम्॥ **6.79.34** ॥

बाणैश्चतुर्भिराकाशे शूलं चिच्छेद राघवः।
स भिन्नो नैकधा शूलो दिव्यहाटकमण्डितः।
व्यशीर्यत महोल्केव रामबाणार्दितो भुवि॥ **6.79.35** ॥

तच्छूलं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा।
साधु साध्विति भूतानि व्याहरन्ति नभोगताः॥ **6.79.36** ॥

तं दृष्ट्वा निहतं शूलं मकराक्षो निशाचरः।
मुष्टिमुद्यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाब्रवीत्॥ **6.79.37** ॥

स तं दृष्ट्वा पतन्तं तु प्रहस्य रघुनन्दनः।
पावकास्त्रं ततो रामः सन्दधे तु शरासने॥ **6.79.38** ॥

तेनास्त्रेण हतं रक्षः काकुत्स्थेन तदा रणे।
सञ्छिन्नहृदयं तत्र पपात च ममार च॥ **6.79.39** ॥

दृष्ट्वा ते राक्षसाः सर्वे मकराक्षस्य पातनम्।
लङ्कामेव प्रधावन्त रामबाणभयार्दिताः॥ **6.79.40** ॥

दशरथनृपसूनुबाणवेगै
रजनिचरं निहतं खरात्मजं तम्।
प्रददृशुरथ देवताः प्रहृष्टा
गिरिमिव वज्रहतं यथा विकीर्णम्॥ **6.79.41** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनाशीतितमः सर्गः॥